# सिंहः

1- अपि युष्माभिः कदाऽपि कुत्रापि सिंहो दृष्टः? नास्माभिः दृष्टः।

2- पश्यत, अत्रास्ति सिंहस्य चित्रम्। सिंहो न ग्राम्यः, किन्तु वन्यो मृगः।

3- अरण्यवासिनां शार्दूलसूकरादीनां मध्ये सिंहः शूरो मानी गम्भीरो बलिष्ठश्च।

4- अनितरसाधारणेन विक्रमेण स सर्वान् मृगानतिशेते।

5- अतः स 'मृगराजः' इति प्रथां भजते ।

6- सिंहानां शिरसि कण्ठे च धूसराः केसराः सन्ति।

7- अतस्ते केसरिण इत्यभिधीयन्ते।

8- तेषामास्यमतीव विस्तृतम्।

9- तेन ते पञ्चास्या इत्याख्यायन्ते।

10-तेषामक्षिणी पिङ्गले भासुरे च।

11-सिंहेष्वतिदीर्घाः खरा नखराः परुषा दन्ताश्चेश्वरेण सृष्टाः॥

12-केसरिणो न सर्वत्र देशेषु निवसन्ति।

13-आफ्रिकाखण्डे ते प्राचुर्येणोपलभ्यन्ते।

14-भारतखण्डे तु ते पुरा शुतुद्र्याः सिन्धोश्च मध्यवर्तिनि सिकतारण्ये न्यवसन्।

15-इदानीं तु ते गुर्जरदेशस्य दक्षिणतः स्थितेषु घोरारण्येषु वसन्ति॥

Sanskrit cümlelerin gramatik analizini yaparak Türkçeye çevirmek.